अथ मत्वर्थीयाः

1185. **तदस्यास्त्यस्मिन्निति मतुप् (5-2-94) ॥विधिसूत्रम् ॥**
(प्रथमान्तात् प्रातिपदिकाद् अस्यास्तीत्यर्थे अस्मिन्नस्तीत्यर्थे वा तद्धितसञ्ज्ञो मतुप्-प्रत्ययः स्यात्)।
गावोऽस्यास्मिन् वा सन्ति-गोमान्।

1186. **तसौ मत्वर्थे (1-4-19) ॥सञ्ज्ञासूत्रम् ॥**
तान्तसान्तौ भसञ्ज्ञौ स्तो मत्वर्थे प्रत्यये परे। गरुत्मान्। वसोः सम्प्रसारणम्। विदुष्मान्।
(वा.) **गुणवचनेभ्यो मतुपो लुगिष्टः।** शुक्लो गुणोऽस्यास्तीति शुक्लः पटः। कृष्णः।

1185. **तदस्यास्तीति** - तत्, अस्य, अस्ति, अस्मिन्, इति, मतुप्, इतिच्छेदः। **तदस्य अस्ति, तद् अस्मिन् अस्ति इत्यर्थे प्रथमान्ताद् मतुप्प्रत्ययो वा भवतीत्यर्थः।** यथा गोमान्। मतोरर्थः, मत्वर्थः, मत्वर्थेभवाः मत्वर्थीयाः। गहादीनामाकृतिगणत्वात् छप्रत्यये, छस्य ईयादेशे, बहुत्वे मत्वर्थीयाः इति।

विशेषः - सूत्रस्थ-इतिशब्दः 'अस्ति' इत्यस्य विवक्षायां ये मतुबादयो भवन्ति, तेषां विशेषविषयाणां बोधार्थम्। यथा-

भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥

अत्र 'अस्ति' इत्यस्य विवक्षायां क्रियमाणेषु मतुबादिषु निम्नविषयाः लभ्यन्ते।

1. भूमन् (भूमा) = बहुत्वम्, आधिक्यम्, यथा-गोमान्, धनवान्।
2. निन्दा = कुष्ठीपुरुषः, ककुदावर्तिनी कन्या, सङ्खादकी (दन्तुरः)।
3. प्रशंसा = प्रशस्तं रूपम् अस्ति अस्य रूपवान्। मातृमान्। पितृमान्।
4. नित्ययोगः = नित्यसम्बन्धः, यथा - नित्यं क्षीरमस्त्येषां क्षीरिणः (वृक्षाः)।
5. अतिशायनम् = अतिशयः, अतिशयितम् उदरमस्ति अस्याः उदरिणी (कन्या)।
6. सम्बन्धः (संयोगः) = दण्डोऽस्त्यस्य दण्डी, छत्रमस्त्यस्य छत्री।

रूपसिद्धिः

गोमान् - गावः सन्ति अस्य, गावः सन्ति अस्मिन् वेत्यर्थे 'गो जस्' इत्यस्मात् ''तदस्यास्त्यस्मिन्निति मतुप्'' इति मतुप्प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुपो लुकि, गोमत्शब्दात् प्रातिपदिकात् सुप्रत्ययेऽनुबन्धलोपे, गोमत् स् इति जाते, ''अत्वसन्तस्य चाऽधातोः'' इत्युपधादीर्घे, ''उगिदचां सर्वनामस्थानेऽधातोः'' इति नुमागमेऽनुबन्धलोपे, गोमान् त् स् इति जाते, हल्ङ्यादिना सलोपे संयोगान्त-तलोपे च कृते 'गोमान्' इति सिद्धम्।

1186. **तसाविति** - तसौ, मत्वर्थे, इतिच्छेदः। तश्च स् च तसौ, इतरेतरद्वन्द्वः। तकारादकार उच्चारणार्थः। विशेषणत्वात्तसौ इत्यस्मात्तदन्तविधिः। मतोरर्थः मत्वर्थः, तस्मिन् = मत्वर्थे, षष्ठीतत्पुरुषः। **तकारान्ताः सकारान्ताश्च भसञ्ज्ञकाः स्युः मत्वर्थे प्रत्यये परे इत्यर्थः।** भसञ्ज्ञात्वात् पदसञ्ज्ञाभावः। अतः पदत्वप्रयुक्तानि कार्याणि न स्युरिति विभिन्नोदाहरणैः ज्ञेयम्।

रूपसिद्धिः

गरुत्मान् - गरुतौ (पक्षौ) स्तोऽस्येति अर्थे 'गरुत् औ' इत्यस्मात् ''तदस्यास्त्यस्मिन्निति मतुप्'' इति मतुप्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकात् सुपो लुकि, गरुत् मत् इति जाते, पदसञ्ज्ञां प्रबाध्य ''तसौ मत्वर्थे'' इति भसञ्ज्ञायां पदत्वाभावे जश्त्वानुनासिकयोरभावे, प्रातिपदिकत्वात् प्रथमैक-वचने सुविभक्तौ, अनुबन्धलोपे गरुत्मत् स् इति जाते, ''अत्वसन्तस्य चाऽधातोः'' इत्युपधादीर्घे, गरुत्मात् स् इति जाते, उगित्त्वान्नुमि, अनुबन्धलोपे, गरुत्मान् त् स् इति जाते, सलोपे नलोपे च 'गरुत्मान्' इति रूपं सिद्धम्। गरुत्मान्, गरुतमन्तौ, गरुत्मन्तः। 'धीमत्' शब्दवत् रूपाणि स्युः। एवमेव विद्युत्वान्, मरुत्वान् इत्यादयः ज्ञातव्याः।

1187. **प्राणिस्थादातो लजन्यतरस्याम्(5-2-96) ॥विधिसूत्रम् ॥**
चूडाल:, चूडावान्। प्राणिस्थात् किम्? शिखावान् दीप:। प्राण्यङ्गादेव, नेह मेधावान्।

1188. **लोमादि-पामादि-पिच्छादिभ्य: शनेलच:(5-2-100) ॥विधिसूत्रम् ॥**
(मत्वर्थे)- ल ोमादिभ्य:श ा: ल ोमश:,ल ोमवान्।र ोमश:,र ोमवान्।प ामादिभ्योन :।प ामन:। **अङ्गात् कल्याणे** (गणसूत्रम्)। अङ्गना। **लक्ष्म्या अच्च** (गणसूत्रम्)। लक्ष्मण:। पिच्छादिभ्य इलच्। पिच्छिल:, पिच्छवान्।

विदुष्मान् - विद्वांस: सन्त्यस्येत्यर्थे (वंश:, देश:, प्रदेशो वा)। 'विद्वस् जस्' इत्यस्मात् मतुप्-प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात्सुब्लुकि, पदसंज्ञां प्रबाध्य भसंज्ञायां वसुस्रंसुरिति सस्य दत्वाभावे, ''वसो: सम्प्रसारणम्'' इति व इत्यस्य उत्वे सम्प्रसारणे, ''सम्प्रसारणाच्च'' इति पूर्वरूपे, विदुस् मत् इति जाते, ''आदेशप्रत्यययो:'' इति सस्य षत्वे, स्वादिकार्ये 'विदुष्मान्' इति रूपं सिद्धम्। एवमेव वपुष्मान्, आयुष्मान्, चक्षुष्मान्, ज्योतिष्मान् धनुष्मान् इत्यादयोऽपि बोधनीया:। **(वा.) गुणवचनेभ्य इति** - गुणवाचक-शब्देभ्यो मतुपो लुक् स्यात्। यथा शुक्ल:।

रूपसिद्धि:

शुक्ल: (पट:) - शुक्ल अस्यास्त्यर्थे 'शुक्ल सु' इत्यस्मात् मतुप्-प्रत्यये, ''गुणवचनेभ्य: मतुपो लुगिष्ट:'' इति वार्तिकेन मतुपो लुकि, स्वादिकार्ये 'शुक्ल:' इति रूपं सिद्धम्। एवमेव कृष्ण: (पट:), नीलो घट इत्यादयोऽपि ज्ञातव्या:।

1187. **प्राणिस्थादिति** - प्राणिस्थात्, आत:, लच्, अन्यतरस्याम् इतिच्छेद:। प्राणिषु तिष्ठतीति प्राणिस्थम्, तस्मात् = प्राणिस्थात्, प्राणिस्थवाचकात् इति भाव:। **प्राणिस्थात् प्रथमान्तात् आदन्तात् मत्वर्थे लच्-प्रत्ययो वा स्यादित्यर्थ:।** यथा चूडाल:। इह चकारानुबन्ध:। स्वरार्थ:।

रूपसिद्धि:

चूडाल:, चूडावान् वा - चूडा अस्त्यस्येत्यर्थे (चूडाशब्द: प्राणिस्थशिखावाचक:) 'चूडा सु' इत्यस्मात् ''प्राणिस्थादातो लजन्यतरस्याम्'' इति विकल्पेन लच्-प्रत्ययेऽनुबन्धलोपे, चूडा सु ल इति जाते, प्रातिपदिकत्वात्सुब्लुकि, रामशब्दवत्स्वादिकार्ये 'चूडाल:' इति रूपं सिद्धम्। पक्षे विकल्पाभावे (लजभावे) मतुप्-प्रत्ययेऽनुबन्धलोपे,स ुब्लुकि' 'मादुपधायाश्चम तोर्वोऽयवादिभ्य:''इ तिम स्यव त्वे,स् वादिकार्ये' चूडावान्'इ ति रूपमपि सिध्यति। एवमेव जङ्घाल:, जङ्घावान्, जिह्वाल:, जिह्वावान्, ग्रीवाल:, ग्रीवावान् इत्यादयोऽपि ज्ञातव्या:।

प्राणिस्थात् किम्? शिखावान् दीप:।

अत्र दीपस्य अप्राणित्वात् न लच्। यदि प्राणिस्थादिति नोच्येत तर्हि शिखावान् इत्यत्रापि लज्भूत्वा ''शिखालो दीप:'' इति अनिष्टापत्ति: स्यात्।

प्राण्यङ्गादेव, नेह - मेधावान्।

भाष्यकारस्य कथनमस्ति यत् सूत्रगत- 'प्राणिस्थात्' इत्यस्य 'प्राण्यङ्गात्' इत्यभिप्रायोऽवगन्तव्य:। अत: 'मेधा' अस्ति अस्येति मेधावान् अत्र 'मेधा' इत्यस्मात् लच् न स्यात्, यतोहि मेधा यद्यपि प्राणिषु तिष्ठति तथापि अमूर्त्तत्वात् न प्राण्यङ्गम्। अत: मतुपि मस्य वत्वे स्वादिकार्ये मेधावान् इति रूपं सिध्यति। एवमेव चिकीर्षावान्, शोभावान्, इच्छावान् (पुरुष:) इत्यादयोऽपि ज्ञातव्या:।

1188. **लोमादिति** - लोमादि-पामादि-पिच्छादिभ्य:, श-न-इलच:, इतिच्छेद:। लोमन्शब्द: आदिर्येषां ते लोमादय:, पामन्शब्द: आदिर्येषां ते पामादय:, पिच्छशब्द: आदिर्येषां ते पिच्छादय:, सर्वत्र तद्गुणसंविज्ञानबहुव्रीहि:। लोमादयश्च पामादयश्च पिच्छादयश्च तेभ्य: = लोमादिपामादिपिच्छादिभ्य:, इतरेतरद्वन्द्व:। शश्च नश्च इलच्च शनेलच:, इतरेतरद्वन्द्व:। **अस्य अस्ति अस्मिन्नित्यर्थे (मत्वर्थे) लोमादि-पामादि-पिच्छादिभ्य: प्रथमान्तेभ्य: श-न-इलच्-प्रत्यया: अन्यतरस्यां स्यु:।** पक्षे मतुप्। इलच् इत्यत्र चकारानुबन्ध: स्वरार्थ:। **लोमादिगणो यथा** - लोमन्। रोमन्। बभ्रु। हरि। गिरि। कर्क। कपि। मुनि। तरु। एभ्य: श: भवति।

1189. **दन्त उन्नत उरच्(5-2-106) ॥विधिसूत्रम् ॥**

(उन्नतोपाधिकात् प्रथमान्ताद् दन्तप्रातिपदिकान्मत्वर्थे उरच् तद्धितः स्यात्)। उन्नताः दन्ताः सन्त्यस्य - दन्तुरः।

पामादिगणो यथा - पामन्। वामन्। वेमन्। हेमन्। श्लेष्मन्। कद्रू। बलि। श्रेष्ठ। पलल। सामन्। ऊष्मन्। कृमि। अङ्गात् कल्याणे (ग.सू.)। शाकी-पलाली-दद्र्वां ह्रस्वत्वं च (ग.सू.)। विश्वगित्युत्तरपदलोपश्चाकृतसन्धेः (ग.सू.)। लक्ष्म्या अच्च (ग.सू.)। **पिच्छादिगणो यथा** - पिच्छ। उरस्। ध्रुवका। क्षुवका। जटा-घटा-कालात् क्षेपे (ग.सू.)। वर्ण। उदक। पङ्क। प्रज्ञा।

रूपसिद्धिः

लोमशः, लोमवान् - लोमानि सन्ति अस्येत्यर्थे 'लोमन् जस्' इत्यस्मात् ''लोमादिपामादिपिच्छादिभ्यः शनेलचः'' इति विकल्पेन शप्रत्यये, प्रातिपदिकत्वात् सुब्लुकि, पदसञ्ज्ञायां ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे, स्वादिकार्ये 'लोमशः' इति रूपं सिद्धम्। पक्षे मतुप्-प्रत्यये, सुब्लुकि, पदत्वे, नलोपे, ''मादुपधायाश्च मतोर्वोऽयवादिभ्यः'' इति मस्य वत्वे, स्वादिकार्ये 'लोमवान्' इति रूपं सिद्धम्।

रोमशः, रोमवान् - रोमाणि सन्त्यस्येत्यर्थे 'रोमन् जस्' इत्यस्मात् ''लोमादिपामादिपिच्छादिभ्यः शनेलचः'' इति विकल्पेन शप्रत्यये, प्रातिपदिकत्वात्सुब्लुकि, पदसञ्ज्ञायां ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे, स्वादिकार्ये, 'रोमशः' इति रूपं सिद्धम्। पक्षे मतुप्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, पदत्वे, नलोपे, मस्य वत्वे, स्वादिकार्ये 'रोमवान्' इति रूपं सिद्धम्। एवमेव गिरिशः, गिरिमान्। कपिशः, कपिमान्। इत्यादि।

पामनः - पाम (गीली खुजली इति भाषायाम्) अस्त्यस्येत्यर्थे 'पामन् सु' इत्यस्मात् ''लोमादि.'' इत्यादिना सूत्रेण पामादित्वात् नप्रत्यये, सुब्लुकि, ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे, स्वादिकार्ये 'पामनः' इति रूपं सिद्धम्। पक्षे मतुपि पूर्ववत् पामवान् इत्यपि बोध्यम्। एवमेव हेम (सुवर्णम्) अस्त्यस्येत्यर्थे हेमनो हेमवान् वा। श्लेष्मणः, श्लेष्मवान्। ऊष्मणः, ऊष्मवान्। कृमिणः, कृमिमान्। इत्यादि।

अङ्गना - कल्याणानि अङ्गानि सन्त्यस्या इत्यर्थे 'अङ्ग जस्' इत्यस्मात् ''लोपादि.'' इत्यादिना सूत्रेण नप्रत्यये, सुब्लुकि, स्त्रीत्वे ''अजाद्यतष्टाप्'' इति टाप्-प्रत्ययेऽनुबन्धलोपे, सवर्णदीर्घे, स्वादिकार्ये 'अङ्गना' इति रूपं सिद्धम्।

लक्ष्मणः - लक्ष्मीरस्त्यस्येत्यर्थे 'लक्ष्मी सु' इत्यस्मात् ''लोमादि. इत्यादिना विकल्पेन नप्रत्यये, सुब्लुकि, ''लक्ष्म्या अच्च'' इति ईकारस्य अकारान्तादेशे, लक्ष्मन इति जाते ''अट्कुप्वाङ्नुम् व्यवायेऽपि'' इति नस्य णत्वे, 'लक्ष्मणः' इति रूपं सिद्धम्। पक्षे मतुपि, मस्य वत्वे, 'लक्ष्मीवान्' इत्यपि सिद्धम्।

पिच्छिलः - पिच्छमस्त्यस्येत्यर्थे 'पिच्छ सु' इत्यस्मात् ''लोमादि.'' इत्यादिना विकल्पेन 'इलच्' प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, भत्वाद् अकारलोपे पिच्छिल इति जाते, स्वादिकार्ये 'पिच्छिलः' इति रूपं सिद्धम्। पक्षे विकल्पाभावे मतुपि, मस्य वत्वे, 'पिच्छवान्' इति रूपं सिद्धम्। एवमेव उरसिलः उरस्वान् वा। पङ्किलः पङ्कवान् वा इत्यादयोऽपि बोद्धव्याः।

1189. **दन्त उन्नत इति** - दन्ते, उन्नते, उरच् इतिच्छेदः। दन्ते इत्यत्र पञ्चम्यर्थे सप्तमी। उन्नते इति दन्तविशेषणम्। **दन्ते उन्नते प्रथमान्ताद् दन्तशब्दात् तदस्यास्त्यस्मिन्निति अर्थे तद्धितसञ्ज्ञक उरच् प्रत्ययः स्यात्।** इह चकारानुबन्धः स्वरार्थः।

रूपसिद्धिः

दन्तुरः - उन्नता दन्ताः सन्त्यस्येत्यर्थे 'दन्त जस्' इत्यस्मात् ''दन्त उन्नत उरच्'' इति उरच्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि, भत्वादकारलोपे 'दन्तुर' इति जाते, स्वादिकार्ये 'दन्तुरः' इति रूपं सिद्धम्।

1190. **केशाद्वोऽन्यतरस्याम् (5-2-107) ॥विधिसूत्रम् ॥**

(प्रथमान्तात् केशप्रातिपदिकाद् मत्वर्थे तद्धितसञ्ज्ञो 'व' प्रत्ययो वा स्यात्। केशवः। केशी। केशिकः। केशवान्।

(वा.) **अन्येभ्योऽपि दृश्यते।**

मणिवः

(वा.) **अर्णसो लोपश्च।**

अर्णवः।

1191. **अत इनिठनौ (5-2-115) ॥विधिसूत्रम् ॥**

(अदन्तात् प्रातिपदिकान्मत्वर्थे इनिठनौ तद्धितप्रत्ययौ वा स्तः)।

दण्डी, दण्डिकः।

1190. **केशादिति** - केशात्, वः, अन्यतरस्याम् इतिच्छेदः। **केशात् तदस्यास्त्यस्मिन्निति अर्थे तद्धितः व प्रत्ययः वा स्यात्।** ननु प्राणिस्थादातो लजन्यतरस्यामिति इत्यस्मात् अनुवृत्तेन एव अन्यतरस्यां ग्रहणेन मतुपः सिद्धिरस्ति, पुनरत्र अन्यतरस्याम् व्यर्थमिति चेत् उच्यते पुनर्ग्रहणम् इनिठनोः समावेशार्थम्।

रूपसिद्धिः

केशवः - केशाः सन्ति अस्येत्यर्थे 'केश जस्' इत्यस्मात् ''केशाद्वोऽन्यतरस्याम्'' इति विकल्पेन वप्रत्यये, सुब्लुकि, स्वादिकार्ये 'केशवः' इति रूपं सिद्धम्। वप्रत्ययस्य अभावे ''अत इनिठनौ'' इति इनिप्रत्ययेऽनुबन्धलोपे, भत्वादकारलोपे, प्रादिपदिकत्वात् सौ ''सौ च'' इति उपधादीर्घे, सुलोपे, नलोपे 'केशी' इति रूपम्। ठनि, ''ठस्येकः'' इति ठस्य इकादेशे, भत्वादलोपे, स्वादिकार्ये 'केशिकः' इति रूपम्। मतुपि, मस्य वत्वे, स्वादिकार्ये 'केशवान्' इति रूपं निष्पन्नम्।

वा. अन्येभ्योऽपि इति - अन्यशब्देभ्योऽपि कदाचिद् वप्रत्ययो भवतीत्यर्थः। यथा मणिवो नागविशेषः।

रूपसिद्धिः

मणिवः - मणिरस्त्यस्येत्यर्थे 'मणि सु' इत्यस्मात् ''अन्येभ्योऽपि दृश्यते'' इति वार्तिकेन वप्रत्यये, सुब्लुकि, स्वादिकार्ये 'मणिवः' इति रूपं सिद्धम्। एवमेव हिरण्यम् अस्त्यस्येति हिरण्यवः (निधिविशेषः) इत्यादि।

(वा.) अर्णस इति - अर्णसो वप्रत्ययः प्रकृतेः सकारस्य च लोपः स्यात्। अर्णवः।

रूपसिद्धिः

अर्णवः - अर्णांसि = जलानि सन्त्यस्मिन् इत्यर्थे 'अर्णस् जस्' इत्यस्मात् वप्रत्यये सलोपे च कृते, सुब्लुकि स्वादिकार्ये 'अर्णवः' इति रूपं सिद्धम्।

1191. **अत इनिठनौ इति** - अतः, इनिठनौ, इतिच्छेदः। **प्रथमान्ताद् अदन्ताद् मत्वर्थे इनिठनौ प्रत्ययौ भवत इत्यर्थः।** अन्यतरस्याम् इत्यस्यानुवृत्तेः मतुप्-प्रत्ययोऽपि समुच्चीयते। यथा दण्डी, दण्डिकः।

रूपसिद्धिः

दण्डी दण्डिको वा -द ण्डोऽस्यास्तीत्यर्थें दण्डस ु'इ त्यस्मात्' 'अतइ निठनौ''इ तिइ निप्रत्ययेऽनुबन्धलोपे, सुब्लुकि भत्वादलोपे, सौ, 'सौ चेति' उपधादीर्घे, सलोपे, नलोपे 'दण्डी' इति रूपं सिद्धम्। पक्षे ठन्-प्रत्ययेऽनुबन्धलोपे दण्ड ठ् इति जाते, ''ठस्येकः'' इति ठस्य इकादेशे, भत्वादकारलोपे दण्ड् इक इति जाते, स्वादिकार्ये 'दण्डिकः' इति रूपं सिद्धम्। इनिठनोरभावे मतुपि, सुब्लुकि, मस्य वत्वे, स्वादिकार्ये 'दण्डवान्' इत्यपि रूपं निष्पद्यते। एवमेव छत्री, छत्रिकः छत्रवान्। धनी, धनिकः धनवान्।

1192. **व्रीह्यादिभ्यश्च (5-2-116) ॥ विधिसूत्रम् ॥**
(व्रीह्यादिभ्य: प्रथमान्तेभ्यो मतुबर्थे इनिठनौ स्त:) । व्रीही, व्रीहिक: ।

1193. **अस्-माया-मेधा-स्रजो विनि: (5-2-121) ॥ विधिसूत्रम् ॥**
(असन्ताद् माया-मेधा-स्रज् इत्येतेभ्यश्च मत्वर्थे विनि: स्यात्) । यशस्वी, यशस्वान् । मायावी । मेधावी । स्रग्वी ।

1192. **व्रीह्यादिभ्यइ ति** - व्रीह्यादिभ्य:, च, इतिच्छेद: । व्रीहिशब्द आदिर्येषां ते, व्रीह्यादय:, तद्गुणसंविज्ञानबहुव्रीहि: । **व्रीह्यादिगणपठित शब्देभ्य मत्वर्थे इनिठनौ प्रत्ययौ भवत: ।** यथा व्रीही, व्रीहिक: । पक्षे मतुप् । व्रीहिमान् ।

रूपसिद्धि:

व्रीही, व्रीहिक: - व्रीहय: सन्त्यस्यास्मिन् वा इत्यर्थे 'व्रीहि जस्' इत्यस्मात् ''व्रीह्यादिभ्यश्च'' इति इनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, भत्वादिकारलोपे व्रीह् इन् इति जाते, स्वादिकार्ये 'व्रीही' इति रूपम् । ठन्पक्षे ''ठस्येक:'' इति ठस्य इकादेशे, भत्वाद् इकारलोपे, स्वादिकार्ये, व्रीहिक: इति रूपम् । अन्यतरस्याम् इति अनुवर्त्तनाद् मतुप्-प्रत्यये 'व्रीहिमान्' इत्यपि बोध्यम् ।

एवमेव - (1) मायाऽस्त्यस्येति मायी, मायिक:, मायावान् । (2) शिखी, शिखावान् । माली, मालावान् । (4) सङ्गी, सङ्गावान् । (5) केकी (मयूर:), केकावान् । (6) मेखली, मेखलावान् । (7) पताकी, पताकावान् । (8) यवखदिक: (यवसारवान्), यवखदवान् । (9) नाविक:, नौमान् । इत्यादयोऽपि बोधनीया: ।

1193. **अस्माया इति** - अस्मायामेधास्रज:, विनि:, इतिच्छेद: । अस् च माया च मेधा च स्रक् चैषां समाहार: - अस्मायामेधास्रक्, तस्मात् = अस्-माया-मेधा-स्रज:, समाहारद्वन्द्वे समासान्ताभाव: सौत्र: । **प्रथमान्ताद् असन्ताद्, माया, मेधा, स्रज् इत्येभ्यश्च शब्देभ्य: मत्वर्थे विनिप्रत्ययो भवतीत्यर्थ: ।** यथा यशस्वी इत्यादय: ।

रूपसिद्धि:

यशस्वी, यशस्वान् - यश: अस्यास्तीत्यर्थे 'यशस् सु' इत्यस्मात् ''अस्-माया-मेधा स्रजो विनि:'' इति विनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, यशस्विन् इति जाते, पदसङ्गां प्रबाध्य ''तसौ मत्वर्थे'' इति भसङ्गायाम्, एतेन सस्य रुत्वाभावे, प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे यशस्विन् स् इति जाते, ''सौ च'' इत्युपधादीर्घे, सुलोपे, नलोपे 'यशस्वी'इ तिरू पं सद्धिम् ।अ न्यतरस्यामि्इ त्यनुवर्त्तनात्म तुपिस ुब्लुकि,य शस्म त्इ तिज ाते,प ूर्ववत्भ त्वाद् रुत्वाभावे, मस्य वत्वे, यशस्वत् इत्यस्मात् प्रथमैकवचने सुविभक्तौ, अनुबन्धलोपे, ''अत्वसन्तस्य चाऽधातो'' इति उपधादीर्घे, नुमागमेऽनुबन्धलोपे, सुलोपे, संयोगान्ततलोपे 'यशस्वान्' इति रूपं सिद्यति । एवमेव पयस्वी, पयस्वान् । तेजस्वी, तेजस्वान् । ओजस्वी, ओजस्वान् । महस्वी, महस्वान् । मेदस्वी । वर्चस्वी । मनस्वी इत्यादयोऽपि बोद्धव्या: ।

मायावी - माया अस्त्यस्येत्यर्थे 'माया सु' इत्यस्मात् विनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, स्वादिकार्ये 'मायावी' इति रूपं सिद्धम् । व्रीह्यादिगणे पाठत्वात् इनिपक्षे 'मायी', ठन्-पक्षे 'मायिक:' इति रूपद्वयम् । अन्यतरस्याम् इत्यनुवर्त्तनात् मतुपि 'मायावान्' इति बोध्यम् ।

मेधावी(धारणावतीब ुद्धि:) - मेधा अस्यास्तीत्यर्थे 'मेधा सु' इत्यस्मात् विनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, स्वादिकार्ये 'मेधावी' इति रूपं सिद्धम् । मतुपि 'मेधावान्' इत्यपि सिध्यति ।

स्रग्वी - स्रग् (माला) अस्यास्तीत्यर्थे 'स्रज् सु' इत्यस्मात् विनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, पदसङ्गायां ''क्विन्प्रत्ययस्य कु:'' इति जस्य गत्वे (कुत्वे), स्वादिकार्ये 'स्रग्वी' इति रूपं सिद्धम् । मतुपि, कुत्वे 'स्रग्वान्' इत्यपि सिध्यति ।

1194. **वाचो ग्मिनिः (5-2-124) ॥विधिसूत्रम् ॥**
(प्रथमान्ताद् 'वाच्' इति प्रातिपदिकान्मत्वर्थे ग्मिनिस्तद्धितप्रत्ययः स्यात्)। वाग्ग्मी।

1195. **अर्श आदिभ्योऽच् (5-2-127) ॥विधिसूत्रम् ॥**
(अर्श आदिभ्यः प्रथमान्तेभ्यो मत्वर्थेऽच् तद्धितः प्रत्ययः स्यात्)।
अर्शोऽस्य विद्यते-अर्शसः। आकृतिगणोऽयम्।

1196. **अहंशुभमोर्युस् (5-2-140) ॥विधिसूत्रम् ॥**
(अहम्, शुभम् इत्येताभ्यामव्ययाभ्यां मत्वर्थे तद्धितो युस्-प्रत्ययः स्यात्)। अहंयुरहङ्कारवान्। शुभंयुः शुभान्वितः।

। इति मत्वर्थीयाः ।

1194. **वाचो ग्मिनि इति** - वाचः, ग्मिनि, इतिच्छेदः। **प्रथमान्ताद् वाच्शब्दात् मत्वर्थे ग्मिनिः स्यादित्यर्थः।** यथा वाग्ग्मी।

रूपसिद्धिः

वाग्ग्मी - वाचोऽस्य सन्तीत्यर्थे अथवा प्रशस्ता वाग् अस्यास्तीत्यर्थे 'वाच् सु' इत्यस्मात् ''वाचो ग्मिनिः'' इति ग्मिनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि, पदसञ्ज्ञायां ''चोः कुः'' इति पदान्त-चकारस्य ककारे, जश्त्वे, वाग्ग्मिन् इति जाते, प्रातिपदिकत्वात्स्वादिकार्ये 'वाग्ग्मी' इति रूपं सिद्धम्।

1195. **अर्श आदिभ्य इति** - अर्श आदिभ्यः, अच् इतिच्छेदः। अर्शस्शब्द आदिर्येषां तानि अर्श आदीनि, तेभ्यः = अर्श आदिभ्यः, तद्गुणसंविज्ञानबहुव्रीहिः। अचि चकारः इत्सञ्ज्ञकः। चित्करणं स्वरार्थम्। **अर्श आदिभ्यः मत्वर्थे अच्-प्रत्ययः स्यादित्यर्थः।** अयमाकृतिगणः। यथा अर्शसः।

रूपसिद्धिः

अर्शसः -अर्शांसि (गुदकीलकाः, मस्से) विद्यन्तेऽस्येत्यर्थे (अर्शोरोगपीडितः) 'अर्शस् जस्' इत्यस्मात् ''अर्श आदिभ्योऽच्'' इति अच्प्रत्यये, अनुबन्धलोपे, सुब्लुकि, पुनः विभक्तिकार्ये 'अर्शसः' इति रूपं सिद्धम्। अत्र 'अस्मायामेधा' इति विनिप्राप्ते, तं प्रबाध्य अच्-प्रत्ययो भवति। एवमेव उरसः, तुन्दः, अभ्रम् (नभः), कर्दमः (प्रदेशः), अम्लं (फलम्), लवणः, पलितं (शिरः), काणः, खञ्जः, कुण्ठः, खल्वाटः, शुक्लः, नीलः, पद्मा, कमला, पापः (पुरुषः = पापी), बलः (बलवान्), तिमिरा (निशा), समानाधिकरणः, मृगः, आलस्यः इत्यादयोऽपि ज्ञातव्याः।

1196. **अहं शुभमोर्युस् इति** - अहं शुभमोः, युस् इतिच्छेदः। अहं च शुभं च अहंशुभमौ, तयोः = अहंशुभमोः, इतरेतरद्वन्द्वः। पञ्चम्यर्थे षष्ठीप्रयोगः सौत्रः। **अहंशुभाभ्यां मत्वर्थे युस्-प्रत्ययः स्यादित्यर्थः।** यथा अहंयुः। शुभंयुः।

रूपसिद्धिः

अहंयुः -अहम् (अहङ्कारः) अस्त्यस्येत्यर्थे 'अहम्' इति मान्त-अव्ययात् ''अहंशुभमोर्युस्'' इति युस्-प्रत्ययेऽनुबन्धलोपे, अहम् यु इति जाते, भसञ्ज्ञां प्रबाध्य ''सिति च'' इति पदसञ्ज्ञायां, ''मोऽनुस्वारः'' इति मस्यानुस्वारे ''वा पदान्तस्य'' इति विकल्पेन अनुस्वारस्य परसवर्णे यँ इत्यादेशे, स्वादिकार्ये 'अहयँयुः' इति रूपं पक्षे विकल्पाभावे 'अहंयुः' इति रूपद्वयं सिद्धम्। भानुशब्दवद् रूपाण्यस्य।

शुभंयुः - शुभमस्त्यस्येत्यर्थे शुभम् इति मान्त-अव्ययात् युस्-प्रत्ययेऽनुबन्धलोपे, पदसञ्ज्ञायाम्, पूर्ववत् अनुस्वारे, ''वा पदान्तस्य'' इति विकल्पेन अनुस्वारस्य परसवर्णे 'यँ' इत्यादेशे, स्वादिकार्ये 'शुभयँयुः' इति रूपम्। पक्षे परसवर्णाभावे 'शुभंयुः' इति रूपद्वयं सिद्धम्। भानुशब्दवद्रूपाण्यस्य।

। इति मत्वर्थीयाः ।

अभ्यासः

वस्तुनिष्ठात्मकप्रश्नाः –

1. तान्तसान्तो भवतः –

(क)	पदसञ्ज्ञौ	(ख)	टिसञ्ज्ञौ
(ग)	भसञ्ज्ञौ	(घ)	तद्राजसञ्ज्ञौ

2. गुणवचनेभ्यः लुग्भवति –

(क)	अणः	(ख)	मतुपः
(ग)	इनेः	(घ)	ठनः

3. 'चूडालः' इत्यत्र प्रत्ययोऽस्ति –

(क)	ल	(ख)	लज्
(ग)	लच्	(घ)	आलच्

अतिलघूत्तरात्मकप्रश्नाः –

4. तसौ कस्मिन्नर्थे भसञ्ज्ञौ?
5. तदस्य अस्ति, तद् अस्मिन् अस्ति इत्यर्थे कः प्रत्ययः?
6. लोमादिभ्यः कः प्रत्ययः?
7. अङ्गना इत्यत्र कः प्रत्ययः?
8. लक्ष्मण इत्यस्य विग्रहः कः?

लघूत्तरात्मकप्रश्नाः –

9. 'लोमादि' इत्यादिसूत्रं प्रपूर्य सोदाहरणमर्थं लिखन्तु।
10. तदस्यास्त्यस्मिन्निति मतुप् इति सूत्रस्य अर्थं लिखन्तु।
11. व्रीह्यादिभ्यः कौ प्रत्ययौ कस्मिन्नर्थे भवतः?

निबन्धात्मकप्रश्नाः –

12. अधोलिखिताः प्रयोगाः ससूत्रं साधनीयाः?

    गोमान्, चूडालः, लोमशः, लक्ष्मणः, पामनः, दन्तुरः, केशवः, दण्डी, यशस्वी, मेधावी, वाग्मी, अर्शसः, अहंयुः।
13. अधोलिखितसूत्राणि सोदाहरणं व्याख्यातव्यानि।

    दन्त उन्नत उरच्, केशाद्वोऽन्यतरस्याम्, अत इनिठनौ, अस्मायामेधास्रजो विनिः।
14. प्रकरणस्थसूत्राणां वार्तिकानां च सोदाहरणं सारणी लेखनीया।